भरताग्रजः, पुं, (भरतस्य अग्रजः ।) श्रीरामचन्द्रः । यथा, वोपदेवः ।

"प्रीते स चित्तशयने मम मीनकूर्म्म-
कोलोऽभवन्नृहरिवामनजामदग्न्यः ।
योऽभूद्बभूव भरताग्रजलक्ष्मबुद्धः
कल्की सतां च भविता प्रहरिष्यतेऽरीन् ॥"

भरथः, पुं, (बिभर्त्तीति । भृञ्+"भृञश्चित् ।" उणा० ३ । ११५ । इति अथप्रत्ययः । स च चित् ।) लोकपालः । इत्युणादिकोषः ॥

भरद्वाजः, पुं, (द्वाभ्यां जायते इति । जन्+डः । ततः पृषोदरादित्वात् द्वाजः सङ्करः । भ्रियते मरुद्भिरिति । भृ+अप् । भरः । भरश्चासौ द्वाजश्चेति कर्म्मधारयः ।) मुनिविशेषः । स च उतथ्यपत्न्यां ममतायां बृहस्पतिवीर्य्याज्जातः । तस्य जन्मविवरणं यथा । "ततोऽस्य वितथे पुत्त्रजन्मनि पुत्त्रार्थिने मरुत्सोमयाजिने दीर्घतमसा पार्ष्णप्रहारात्तिरस्कृतबृहस्पतिवीर्य्यादुतथ्यपत्नी-ममतासमुत्पन्नो भरद्वाजाख्यो नाम पुत्त्रो मरुद्भिर्दत्तः । अस्यापि नामनिर्वचनश्लोकः पठ्यते । 'मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते ! । यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥' इति । भरद्वाजश्च तस्य वितथे पुत्त्रजन्मनि मरुद्भिर्दत्तो वितथसंज्ञामवाप ।"*॥ अस्य टीका । वितथे अर्थे सति । अत्रैवमितिहासः । बृहस्पते-रग्रजस्योतथ्यस्य ममताख्या पत्नी गर्भिण्यासीत् । तस्यां बृहस्पतिः कामाभिभूतो वीर्य्यं व्यसृजत् । तत्र गर्भे प्रविष्टगर्भस्थेन स्थानसङ्कोचभयात् पार्ष्णिप्रहारेणापास्तं बहिः पतितमपि अमोघ-वीर्य्यतया बृहस्पतेर्भरद्वाजनामपुत्त्रोऽभूत् । गर्भस्थश्च बृहस्पतिना तस्मादेवापराधादन्धो भवेति शप्तो दीर्घतमा नामाभवत् । तत्र भरद्वाजनामनिरुक्तिपरः तत्पित्रोर्विवादकरोऽयं श्लोको देवैः पठितः । हे मूढे ममते द्वाजं द्वाभ्यामावाभ्यां जातमिमं पुत्त्रं त्वं भर रक्ष । एवं बृहस्पतिनोक्तेव ममता तमाह हे बृहस्पते ! द्वाजं द्वाभ्यां जातमिममेकाकिनी किमितयहं भरिष्यामि । त्वमिमं भरेति परस्परमुक्त्वा तं पुत्त्रं त्यक्त्वा यस्मात् पितरौ ममताबृहस्पती ततो यातौ । ततो भरद्वाजाख्योऽयम् । पाठान्तरे एवं विवदमानौ । यद्दुःखात् यन्निमित्ताद् दुःखान् पितरौ गतावित्यर्थः । तदेवं ताभ्यां त्यक्तो मरुद्भिर्भृतः । मरुत्सोमाख्येन च यागेनाराधितैर्मरुद्भिस्तस्य वितथे पुत्त्रजन्मनि सति दत्तत्वाद्वितथसंज्ञाञ्चावाप । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ *॥ (दाक्षायणापरेऽप्यस्यैव वासः । यथा, देवीभागवते । १ । ३ । २६ ।

"एकादशेऽथ त्रितयो भरद्वाजस्ततःपरम् ।
त्रयोदशे चान्तरिक्षो धर्म्मश्चापि चतुर्द्दशे ॥"

यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहरा
दृष्टा इन्द्रियशक्तिसंक्षयकराः सर्व्वाङ्गपीडाकराः ।
धर्म्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् ॥
तत्तेषां प्रशमाय कश्चन विधिश्चिन्त्यो भवद्भिर्बुधै-
र्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन् ।
त्वं योग्यो भगवन् ! सहस्रनयनं याचस्व लब्धं क्रमा-
दायुर्व्वेदमधीत्य यं गदभयान्मुक्ता भवामो वयम् ॥")

पक्षिविशेषः । भारुइ इति भाषा । तत्पर्य्यायः । व्याघ्राटः २ । इत्यमरः । २ । ५ । १५ ॥ भरद्वाजकः ३ । इति शब्दरत्नावली ॥ (गोत्रभेदः । यथा, मनौ ।

"शाण्डिल्यः काश्यपश्चैव वात्स्यः सावर्णकस्तथा ।
भरद्वाजो गौतमश्च सौकालीनस्तथापरः ॥"

इत्यादि गोत्रशब्दे द्रष्टव्यम् ॥ भृ+शतृ । भरत्+वाजः । संभ्रियमाणहविर्लक्षणान्ने यजमानादौ, त्रि । यथा, ऋग्वेदे । १ । ११६ । १८ ।

"यदयातं दिवोदासाय वर्त्तिर्भरद्वाजायाश्विना हयन्ता ॥"

"भरद्वाजाय संभ्रियमाणहविर्लक्षणान्नाय यजमानाय ।" इति तद्भाष्ये सायनाचार्य्यः ॥)

भरद्वाजकः, पुं, (भरद्वाज+स्वार्थे कन् ।) व्याघ्राटपक्षी । इति शब्दरत्नावली ॥

भरिणी, स्त्री, (मनो बिभर्त्ति हरतीति । भृ+णिनिः । गौरादित्वात् ङीष् । पृषोदरादित्वात् पूर्व्वादीर्घे साधुः ।) हरिद्वर्णः । इत्युणादिकोषः ॥

भरितः, त्रि, (हरितः । पृषोदरादित्वात् हस्य भः ।) हरिद्वर्णः । इत्युणादिकोषः ॥ पुष्टः । भारयुक्तः । भरोऽस्य जात इत्यर्थे इतप्रत्ययेन निष्पन्नः ॥

भरिमा, [न्] पुं, (भृ+"हृभृधृसृस्तृशृभ्य इमनिच् ।" उणा० ४ । १४७ । इति भावे इमनिच् ।) भरणम् । इत्युणादिकोषः ॥ (भ्रियते इति । कुटुम्बः । इत्युज्ज्वलदत्तः ॥)

भरुः, पुं, (भरति बिभर्त्ति जगदिति । भृञ् भरणे+"भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः ।" उणा० १ । ७ । इति उः ।) विष्णुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । समुद्रः । स्वामी । इति संक्षिप्तसारोणादिवृत्तिः ॥ स्वर्णम् । शिवः इति । मेदिनी । रे, ६६ ॥

भरुजः, पुं, (भेति शब्देन रुजतीति । रुज्+क ।) क्षुद्रशृगालः । इति हेमचन्द्रः ॥

भरुटकं, क्ली, (भृ+बाहुलकात् उट । संज्ञायां कन् ।) भृष्टामिषम् । इति हेमचन्द्रः ॥

भर्गः, पुं, (भृज्यते कामादिरनेनेति । भ्रस्ज+"हलश्च ।" इति घञ् ।) शिवः । इत्यमरः ॥ (यथा, कथासरित्सागरे । १ । ३४ ।

"प्रत्युवाच ततो भर्गः पुरा दक्षप्रजापतेः ।
देवि ! त्वञ्च तथान्याश्च बह्व्योऽजायन्त कन्यकाः ।
स मह्यं भवतीं प्रादात् धर्म्मादिभ्योऽपराश्च ताः ॥"

वीतिहोत्रस्य पुत्त्रः । यथा, भागवते । ९ । १७ । ९ ।
"वीतिहोत्रोऽस्य भर्गोऽतो भार्गभूमिरभून्नृप ! ॥")
आदित्यान्तर्गततेजः । यथा,—

"आदित्यान्तर्गतं वर्चो भर्गाख्यं तन्मुमुक्षुभिः ।
जन्ममृत्युविनाशाय दुःखस्य त्रितयस्य च ॥
ध्यानेन पुरुषो यश्च द्रष्टव्यः सूर्य्यमण्डले ॥"

इत्याह्निकतत्त्वम् ॥

भर्गः, [स्] क्ली, (भर्ज्जते इति । भ्रज भर्ज्जने+"अञ्च्यञ्जियुजिभृजिभ्यः कुश्च ।" उणा० ४ । २१५ । इति असुन् कवर्गश्चान्तादेशः ।) ज्योतिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे । ३ । ६२ । १० ।

"तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥")

भर्ग्यः, पुं, (भृज्+"ऋहलोर्ण्यत् ।" ३।१।१२४। इति ण्यत् । चजोरिति कुत्वम् ।) भर्गः । इत्यमरटीकायां भरतरायमुकुटौ ॥

भर्ज्जनं, क्ली, (भ्रज्+ल्युट् ।) भृष्टिः । इति शब्दमाला ॥ भाजा इति भाषा ॥

भर्त्तव्यं, त्रि, (भृ+तव्य ।) भरणीयम् । पोषणीयम् । यथा, दायभागटीकाधृतवचनम् ।

"वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः ।
अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥"

भर्त्ता, [ऋ] पुं, (बिभर्त्ति पुष्णाति पालयति धारयतीति वा । भृञ् धारणपोषणयोः+"ण्वुल्तृचौ ।" ३ । १ । १३३ । इति तृच् ।) अधिपतिः । (यथा, रघौ । १ । ७४ ।

"सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्त्तुरथैनं प्रत्यबोधयत् ॥")

तत्पर्य्यायः । अधिपः २ ईशः ३ नेता ४ परिवृढः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ स्वामी ९ नाथः १० आर्य्यः ११ प्रभुः १२ ईश्वरः १३ विभुः १४ ईशिता १५ इनः १६ नायकः १७ । इति हेमचन्द्रः ॥ (विष्णुः । प्रपञ्चाधिष्ठानत्वेन भरणात् ॥) धातरि पोष्टरि च त्रि । इति मेदिनी । ते, ३८ ॥ (यथा, ऋग्वेदे । १० । २२ । ३ ।

"भर्त्ता वज्रस्य धृष्णोः पिता पुत्त्रमिव प्रियम् ॥"

विवाहितायाः पतिः । यथा, महाभारते । १ । १०४ । २८ ।

"भार्य्याया भरणाद्भर्त्ता पालनाच्च पतिः स्मृतः ।
अहं त्वां भरणं कृत्वा जात्यन्धं ससुतं तदा ।
नित्यकालं श्रमेणार्त्ता न भरेयं महातपः ॥")

भर्त्तृघ्नी, स्त्री, (भर्त्तारं हन्तीति । हन्+टक् । ङीप् ।) पतिघातिनी । इति महाभारतम् ॥

भर्त्तृदारकः, पुं, (भर्त्ता द्रियते इति । दृङ् आदरे+कर्म्मणि घञ् । ततः स्वार्थे कः ।) नाट्योक्तौ युवराजः । इत्यमरः । १ । ७ ।